# निश्चयदार्ढ्यम्

श्रीमन् , अवतरतु , प्राप्तञ्च तत् यदवतरणीयम् । यानचालकस्य मृदुभाषणेन जागरितो सदाविशः दीर्घ निःश्वासानन्तरं करवस्त्रेणाश्रूण्यमार्जयत् । जनकः जननी एका कनिष्ठसोदरी - सदाशिवस्य परिवारः एवम् । पिता गोपालः कृषकः, माता गृहिणी च । सोदरी पञ्चमकक्ष्यायां पठति । पठने उत्सुकःसदाशिवः बाल्ये एव स्वपरिवारस्य दैन्यतां दृष्ट्वा स्वामवस्थां प्रत्यभिजानाति स्म । गोपालः प्रतिदिनंकेदारं गच्छति स्म । प्रातरारभ्य सायाह्नं यावत् तत्र कृषिकर्माणि कृत्वा श्रान्तः सन् गृहं प्रत्यागच्छति सः । धनागममार्गान्तरं विना गोपालः दैनिकव्ययपरिपूर्तये बहुकष्टमनुभवति स्म । रात्रौ निद्रां गते सति सदाशिवः अनेकवारं पित्रोः भाषणं श्रुणोति स्म । यत् परिवारस्य निर्धनतामधिकृत्य । कऋषेःलभ्यमान वार्षिकादायेन एव पठनशुल्कं तथा वस्त्राणि पुस्तकानि च क्रीणाति । उन्नतकुलजात इत्यनेन सर्वकारेणदीयमानानि सःन लभते स्म । मित्राणि सर्वे आडम्बरपूर्णजीवनं यापयति सति सदाशिवः तदृष्ट्वा स्वपरिवारस्य निजामवस्थांमालोच्य दुःखितो भवति स्म ।

सदाशिवः कक्ष्यायां प्रथमस्थानीयः नासीत् । पठनान्तरीक्षस्याभावेन गृहकार्येषु तथा विद्यालयकार्येषुचतस्य इच्छा अल्पा आसीत् । "रे सदाशिव ! त्वं किमेवमुपविशसि ? अलस इव ।" संस्कृताध्यापिका रागिणी भगिनी तं सर्वदा एवं पृच्छति स्म । रागिणी सदाशिवस्य प्रियाध्यापिका अस्ति । सा सर्वदा सदाशिवं स्नेहभाषणैः लालयति स्म । सदाशिवस्यापि मनः भगिन्याः भाषणं आश्वासवर्षरूपेण आनन्दपूर्णं करोति स्म । स्वमनसः वातायनं तस्याःपुरतः उद्घाट्य सःआश्वासमनुभवति स्म । सदाशिवस्य पठनाय आवश्यकानि वस्तूनि रागिणी एव ददाति । रागिण्याः प्रेरणाभाषणं समीपनं सामीप्यञ्च सदाशिवस्य इच्छाशक्तिवर्धनाय अत्यन्तमुपकरोति स्म । गोपालःस्वपुत्रे प्रताक्षां समर्प्य तस्य पठनाय सः बहुक्लेशंसोढ्वा आवश्यकानि वस्तूनि क्रेतुं यतते स्म । एकदा विद्यालये स्वातन्त्र्यदिनाधोषवेलायामुद्घाटकत्वेन जिल्लाकलक्टर् समागतः । तस्य प्रौढिः गाम्भीर्यं तं प्रति आदरः इत्येते सदाशिवस्य मनसि चित्रित इवाभवत् । सः रात्रौ स्वापसमये तमेवाचिन्तयत् । अहमपि तथा भवितुं शक्नोमि वा ? सः मनसि एवमपृच्छत् । अग्रिमदिने रागिणीभगिनीं स्वमनोविचारं सः जाल्येन प्राकटयत् । सा निःसंशयमवदत्-"कुतो न ? त्वयापि शक्यते एव । किन्तु समीचीनपठनमावश्यकम् । अलसता मा भवेत्" इति । ततः परं वर्धतोत्साहः सः स्वपठने व्यापृतोभवत् । स्वेच्छां सःपितरमपि न्यवेदयत् ।पितुः मनसि आनन्दः आकांक्षा च समागतः । रात्रौ जायया सह भाषणसमये सःनिजस्थितिं तां बोधयति स्म । आगामीवर्षे इतरेषामपि केदारान् भाटकरूपेण स्वीकृत्य कृषिः कर्तव्या,तेन अधिकरुप्यकाणि सम्पादनीयानि । कृषिव्ययाय वित्तकोशात् धनं गृहीतव्यमित्यादि भाविकर्याणि विचिन्त्य तौ निद्रां प्राप्तवन्तौ । एवं गते दशमकक्ष्यायाःवार्षिकपरीक्षा समागता । सदाशिवः अत्युत्साहेन स्वपाठान् पठित्वा वर्धितात्मविश्वासः सन् शालामगच्छत् । तस्मिन् वर्षे एव प्रकृतेः संहारताण्डवेन अकाले अधिकवृष्टिरागता । केदारान् ,कुल्याः,नदीः एवं सर्वाण्यपि जलोपप्लवैः प्रपूर्य मानवानां पक्षिमृगादीनाञ्च मनस्सु भीतिमुत्पाद्य बहून् जीवजालान् मृत्युं प्रापिता प्रकृतिः । जलोपप्लवेन गोपालस्यापि कृषिः नाशं गताभवत् । किंकर्तव्यतामूढः सन् सः रात्रौ निद्रां विना स्वपरिवारं वित्तकोशात् स्वीकृतस्य लक्षाधिकधनस्य प्रत्यर्पणविषयञ्च विचिन्त्य कालं यापयति स्म । प्रभाते स्वमातुः दीनदीनरोदनं श्रुत्वा सदाशिवः मातुः प्रकोष्ठं गते सति सः अपश्यत् स्वपितुः देहान्तशरीरं प्रकोष्ठस्योपरि । लघुलेखं लिखित्वा सः स्वबान्धवान् सर्वान् विहाय परलोकमगात् ।

दिनान्यतीतानि । सवपितुः इच्छापूर्तीकरणाय दृढव्रतो भूत्वा सदाशिवः दशमकक्ष्यामुत्तीर्य उपरिपठनञ्च समाप्य

इदानीं जिल्लाध्यक्षरूपेण समागतोस्ति। ऐ ए एस् प्राप्य सः तस्याः एव जिल्लायाः अध्यक्षोस्तीदानीम्। श्वः तस्य पूर्वविद्यालये स्वातन्त्र्यदिनाघोषः प्रचलिष्यति। विशिष्टातिथिः सदाशिवः एव। सदाशिवस्य प्रेरणादायिनी रागिणीभगिनींअपि तत्रैवास्ति। अनुग्रहाशीर्वादाः स्वीकर्तव्याः। सदाशिवस्य मनसि स्वविद्यालयं प्रति , स्वगुरून् प्रति, अभिमानः ।आनन्दलभ्धये ततः किम् ?

----------------------------------------------